# २. द्वितीयोऽध्यायः

## (ज्योतिषशास्त्रस्य ऐतिहासिकत्वम्)

(१) ज्योतिषशास्त्रस्य प्रमुखाचार्याः तेषां ग्रन्थाश्च।

(२) सौरसिद्धान्तस्य ऐतिहासिकत्वम्।

(३) सिद्धान्तकालीकज्योतिषस्य निरूपणम्।

(४) ज्योतिषशास्त्रस्य प्रमुखतत्वानां विवरणम्।

# वराहमिहिर:

**आदित्यदासतनयस्तदवाप्तबोधः काम्पिल्लिके सवितृलब्धवरप्रसादः।**
**आविन्तिको मुनिमतानवलोक्यसम्यग् होरां वराहमिहिरो रुचिरांचकारः।।**

इति वराहमिहिरेण स्वकीये बृहज्जातकाख्यानग्रन्थे १६ अध्याये ५ क्रमाक्रिय श्लोकेन ज्ञायते यत् तेषां पितुर्नाम आदित्यदासः अस्ति। तथा ते काम्पलिक (कलापीनगर) निवासी आसीत्। वराहमिहिरः सूर्यनारायणस्य वरप्रसादात् जायोतिषसिद्धान्तान् अधीत्य अवन्तिका नरेश सभायां सभापदं प्राप्य "बृहज्जातक" नामकग्रन्थं कृतवानिति। ते मगधदेशीय इति भट्टोत्पलस्य मते वर्तते। वराहमिहिरः मगधात् उज्ञयनी गतः इत्यपि केचनाः वदन्ति। तेषां कालविषये किमपि न प्राप्यते यतः वक्तुं न शक्नुमः।

अद्यत्वे यथा संस्कृतज्ञ्याः आंग्लभाषायां ज्ञात्वा प्रतिष्ठां प्राप्नुवन्ति तथैव वराहमिहिरेण तस्मिन्को यवनभाषां अधीत्य नृपसभासु स्वप्रसिद्धिं अप्राप्नोतिति गर्गाचार्यः अयं श्लोके उक्तम्-

**म्लेच्छा हि यवनास्तेषु सम्यग्शास्त्रमिदं स्थितम्।**
**वक्ते..पि पूज्यन्ते किं पुनर्देवविद् द्विजः।।**

वराहमिहिरेण स्वकीय यवन भाषायाः ज्ञानम् बृहज्जातके..क्रियताबुरिजितुमेत्यादि श्लोकैः मेषादिराशीणां यवनभाषायामुल्लेखं कृत्य दर्शितम्।

ज्योतिषशास्त्रे विद्वद्वर्यः पृथुयशः अस्यैव वराहस्यपुत्रः। वराहस्य मातुर्नामः सत्यवती असीत्। एक व्याख्यानात् ज्ञायतेयत्- तेषां विवाहः मयस्य पुत्री छाया सह जातः। तेषां
जन्मकालः श्रीसूर्यनारायण रावेन Life of Varaha Mihira नाम्नी ग्रन्थे चैत्रशुक्ल नवम्यां मध्यान्ह काले अभिजित् मुहूर्ते काम्पलिके, ग्रामे जातः इति। किन्तु तत्समये कर्क लग्न असम्भवः अस्ति। अतः निश्चयेन वक्तुं शंकामुद्भवति।

HANSA MEHTA LIBRARY

तेषां ग्रन्थानां संक्षेपेण विवरणम् मयात्र प्रस्तूयते-

## १. पंञ्चसिद्धान्तिका :-

अस्मिन् ग्रन्थे ब्रह्मसिद्धान्त, सूर्यसिद्धान्त पौलिशसिद्धान्त रोमक तथा वशिष्ठ सिद्धान्तानां संग्रहः सोदाहरणं प्रदत्तः। एषा वराहस्य प्रथम कृतिः। अस्य रचना कालः ५०५ शकाब्दः मन्यन्ते विद्वांशः। अस्य प्रकाशन १९०० ई. सुधाकर द्विवेदिना कारितः।

## २. बृहद्योगयात्रा :-

अष्टादश अध्यायात्मक ग्रन्थो..यं वराहकृतम्. अस्य उल्लेखः वराहेण स्वकीय वृहज्जातकस्य अन्ते कृतः किन्तु अध्यतत्वे अनुपलब्धः।

## ३. बृहज्जातकहोराशास्त्रम् :-

बहुत्र प्रकाशित २५ अध्यायात्मक ग्रन्थो..पि वराहस्य। भारतीय ज्योतिष प्रथम मानवीय ग्रन्थो..पि सम्प्रति उपलब्धः। अस्य रचनाकालः जन्मकालः श्रीसूर्यनारायण रावेन Life of Varaha Mihira नाम्नी ग्रन्थे चैत्रशुक्ल नवम्यां मध्यान्ह काले अभिजित् मुहूर्ते काम्पलिके, ग्रामे जातः इति। किन्तु तत्समये कर्क लग्न असम्भवः अस्ति। अतः निश्चयेन वक्तुं शंकामुद्भवति "अमेरिकन एफेमेरीज" द्वारा ५४० ई. मन्यते।

## ४. विवाहपटलः :-

एतद् अनुपलब्धः ग्रन्थः बृहत्संहिता पूर्वं वराहेण कृतम्। अस्यप्रमाणं वराहस्य बृहत्संहितायां उल्लेखेन प्राप्यते। पीताम्बर प्रणीत विवाहपटलः ग्रन्थाद् भिन्नः अयं ग्रन्थः।

## ५. लघुजातकः :-

वृहज्जातकस्य लघुरूपरूपको ग्रन्थ..यं १७७ श्लोकात्मको सम्प्रति उपलब्ध च।

## ६. वृहत्संहिता :-

विस्तृतरूपेण तथा एकमात्र समपूर्ण उपलब्ध संहिता ग्रन्थो..यं वराहकृतम्

## ७. लग्नवाराहि :-

अतिसंक्षिप्त ४९ श्लोकात्मिको ग्रन्थो..यं प्रकाशितः। विषय, भाषाशैली तथा प्रस्तुति आधारेण अयं न वराहकृतः।

## ८. दैवज्ञवल्लभाः :-

प्रकाशित ग्रन्थो..अयं वराहकृत इति मन्यते। वराहस्य को..पि अज्ञात ग्रन्थाधारेण शारांशनीत्वा अल्पशब्दैः अन्य विद्वानेन पुनर्रचित इति लोकमान्यता।

## ९. जातकार्णवः :-

अस्य करणग्रन्थस्य एकाप्रति काठमाण्डू पुस्तकालये अस्ति। अयं ग्रन्थो वराहकृतम् इति विषये सन्देहः।

## १०. ढिकनिकयात्रा :-

विचित्रनामधारक अयं ग्रन्थो..पि काठमाण्डू पुस्तकालये उपलब्धः। अयंग्रन्थो मुहूर्तविषयकः। अन्यको..पि वराहस्य अयं ग्रन्थः विद्वांशाः मन्यन्ते।

## ११. पञ्चपक्षी :-

वाराणसीस्थ सरस्वतीभवनं एवं काठमाण्डू पुस्तकालये अस्य प्रति अस्ति। अस्य रचनाकालः ११०० शकाब्दः। बनारसे अस्य बहुप्रतयः प्राप्यन्ते। किन्तु सर्वाषु प्रारम्भः एवं अन्तिम श्लोके भिन्नता अस्ति।

## १२. ग्रहणमण्डलफलः :-

अत्यन्त लघु एकएव पृष्ठस्य अयं ग्रन्थः बनारसे अस्ति। अस्यान्ते वराहमिहिर स्थाने वाराहमिहिरकृत इति लिखितम् अस्ति। अस्य भाषया एतद् वाराहकृतम् विषये सन्देहः।

## १३. दिक्कनी यात्रा :-

यात्राविषयक अयं ग्रन्थः काठमाण्डू पुस्तकालये उपलब्धः। अस्मिन् ग्रन्थे भाषासम्बन्धी बहु अशुद्धयः। अस्यकर्त्ता आचार्यवराहः एव इति विषये सन्देहः।

## ब्रह्मगुप्त

ब्रह्मगुप्तेण स्वकीय ब्राह्मस्फुटसिद्धान्ते लिखितं यत्-

**श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपाणाम्।**
**पंचाशत् संयुक्तैर्वर्षशतैः पञ्चभिः ५५० रतीतैः।।७।।**

**ब्राह्मस्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रियैः।**
**त्रिंशत्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन।।८।।**

अनेन ज्ञापते यत् ब्रह्मगुप्तेन ग्रन्थो..यं चापवंशीय व्याघ्रमुखनामक राज्ञः राज्यकाले ५५० शके ३० वर्षावस्थायाम् निर्मितः, अर्थात् एषां जन्म ५२० शके जातः। तेषां पितुर्नाम जिष्णुः अस्ति। ब्रह्मगुप्तः भिन्नमालनिवासी आसीत्।

अद्यत्वे तेषां "ब्राह्मस्फुटसिद्धान्त" तथा "खण्डखाद्यकरण" नामक ग्रन्थद्वयमेव उपलभ्यते। खण्डखाद्यकरणग्रन्थारम्भः ५८७ शके जातः इति ग्रन्थे प्राप्यते। अर्थात् अस्यग्रन्थस्यरचना ६७ वर्षस्य अवस्थायां कृता..स्ति। ब्रह्मसिद्धान्तस्य चतुर्विंशति तमे अध्याये श्लोको..यं वर्तते यत्-

**गणितेन फलं सिद्धं ब्राह्मे ध्यानग्रहे यतो..ध्याये।**
**ध्यानग्रहो द्विसप्तत्यार्याणां न लिखितो..त्र मया।**

अनेन ज्ञायते यत् ब्रह्मगुप्तेण ध्यानग्रहनामक ७२ आर्याणां एक अध्याय अनुमानतः फलादेश विषयक निर्मितासीत् किन्तु अस्मिन्ग्रन्थे न लिखितः। अधुना तन्न प्राप्यते। ज्ञातुं न शक्यते यत् अस्मिनध्याये जातकसम्बन्धी फलं आसीत् वा संहिता ग्रन्थसमान किन्तु आर्यशब्देन ज्ञायते यत् ग्रन्थकारदृष्ट्या तद्बहुमहत्वपूर्ण एवं शिष्येभ्यः ब्रह्मगुप्तमत्या पाठितुं योग्यः आसीत्।

प्रोफेसर साचीनालिखितं यत्- प्राच्यसुधारस्य इतिहासे ब्रह्मगुप्तस्य उच्चस्थानमासीत्। अरब वासीभ्यः टालमीग्रन्थानाम् ज्ञानात्पूर्वं तेभ्यः ब्रह्मगुप्तेन ज्योतिषशास्त्रः पाठितः। कारणं अरबी भाषायाः साहित्ये "सिन्धिद" एवं "अलअरकन्द" ग्रन्थानाम् नामः पुनः पुनः आगच्छति तथा एतौ द्वौ ब्रह्मगुप्तस्य ब्रह्मसिद्धान्त एवं खण्डखाद्यानामनुभवः अस्ति। अनेन ज्ञायते यत् तत्काले सिन्ध प्रान्ते ब्रह्मगुप्तस्य ग्रन्थानाम् बहु प्रचारः आसीत्।

ब्रह्मगुप्तसिद्धान्तं त्यक्त्वा अन्य त्रय ब्रह्म सिद्धान्ताः प्राप्यन्ते किन्तु तेषांरचना अनेन गुप्तेण न कृता।

# लल्लः

लल्लस्य श्रीवृद्धितन्त्र नामक ग्रहगणित ग्रन्थः अस्ति। रत्नकोष नामक मुहूर्त ग्रन्थः अस्ति। अनेन लल्लेन स्थानकादिविषये किमपि लिखितं नास्ति। भास्कराचार्येण गोलाध्याये वृत्तपृष्ठफलानयनसम्बन्धि लल्लस्यैकश्लोकस्य खण्डनं कृतमस्ति, यतः ज्ञायते यत् लल्लस्य पाटिगणितस्य को..पि ग्रन्थः आसीत्। सुधाकरमतानुसारेण लल्लस्य बीजगणितस्यापि ग्रन्थः आसीत्। वेरुनेः ग्रन्थे ९५० शकाब्दपूर्वाणां प्रमिध्धज्योर्तिविद्वां किमपि वर्णनं प्राप्यते, किन्तु लल्लस्य नामापि नास्ति। अतः ज्ञापते यत् तस्मिन्काले लल्लस्य ग्रन्थाः प्रचलिताः नासीत्। लल्लस्य बीसंस्कृतप्रथमार्यसिद्धान्तस्य दक्षिणे बहु प्रचारः अस्ति। एताभ्यां द्वाभ्यां हेतुभ्यां ज्ञापते यत् लल्लः दाक्षिणात्यः आसीदिति। श्रीवृद्धिधतन्त्रस्य मध्यमाधिकारे लिखितमस्ति यत्-

लल्लेन उत्तराधिकारे आर्यसिद्धान्त द्वारा सिद्धग्रहेषु निम्नलिखित बीजसंस्कारान् करणार्थं लिखितम् यत्-

विज्ञाय शास्त्रमलमार्यभट्टप्रणीतं
तन्त्राणि यद्यपि कृतानि तदीयशिस्यैः।
कर्मक्रमो न खलु सम्यगुदीरितस्ततैः
कर्म व्रवीभ्यहमतः क्रमशस्तु सूक्तम्।।

"शाके नखाब्धि ४२० रहिते शशिनो..क्षदस्त्रे २५ स्तन्तुं" गतः कृतशिवै ११४ स्तमसः ष..कैः ९६। शैलाब्धिभिः ४७ शुरगुरोर्गुणितैसितोच्चात् शोध्यं त्रिपञ्चकु १५३ हते..भ्रशराक्षि २५ भक्ते।।१८।। भम्बुधि ४९ हेते क्षितिनन्दस्य सूर्यात्मजस्य गुणिते..म्बरलोचनै २० च। व्योमाक्षिवेद ४२० निहते विदधीत लब्धं शीतांशुसूनुचलतुंगकलासु वृद्धिम्।।१९।। इति.. ग्रहकर्म दृक् प्रभावात्।।२०।। आसीदशेषबुधवन्दितपाद पदम्...।।साम्बस्ततोजनि जनेक्षणकैरवेनुवेन्दुर्भट्टस्त्रिविक्रम इति प्रथितः पृथिव्याम्।।२१।। लल्लेन तस्य तनयेन शशांकमौलैः शैलाधिराज-तनयादयितस्य शम्भोः। सम्पूज्य पादयुगमार्यभटाभिधानसिध्धान्त तुल्यफलं एदतकारितन्त्रम्।।२२।।

श्रीवृद्धितन्त्रे भगण्यादि सर्वमान आर्यभट्टस्य ग्रन्थात् प्राप्यते। किन्तु लल्लेण तत्र उपर्युक्त १८-१९ श्लोकोक्त बीजसंस्कारान् दत्ता: यत: स्पष्टमस्ति यत् ल्लस्य समय: आर्यभट्टात् पर:। परमादीश्वरेण स्वकीय आर्यभट्टीय टीकायां लिखितं यत् "तच्छिष्यो

लल्लाचार्य:"। किन्तु लल्लाचार्येण मिथ्याज्ञानाध्याये लिखितमस्ति यत् "यदि भ्रमतिक्षमा तदा स्वकुलायं कथमाप्नुयु: खगा:" इत्याधारेण सिध्यति यत् आर्यभट्टस्य साक्षात् शिष्य तन्विरुद्धं स्वमतं दर्शयति यत: शिष्यत्वविषये शंका भवति।

लल्लेण रेवती योगताराया: भोग ३५९ अंश: इति लिखित:। लल्लतन्त्रानुसार स्थितिमापकस्य आरम्भस्थानात् अर्थात् स्पष्टमेषसंक्रान्तिकालीन सूर्यस्थानात् प्रतीच्यां एकांशोपरी रेवती योगताराया: काल शक ६०० आगच्छति, किन्तु ब्रह्मगुप्ताय लल्लस्य ग्रन्थ: न प्राप्त:। लल्लस्य ग्रन्थे ब्रह्मगुतस्य तुरीयतन्त्र: एव नास्ति। अन्यत्सर्वं अस्ति, अनेन ज्ञापते यत् लल्लाय ब्रह्मगुप्तस्य ग्रन्थ: न प्राप्त:। अनेनानुमीयते यत् उभौ समकालीन भूत्वापि दूर-दूर निवास: आसीत्।

लल्लकृत रत्नकोषस्याधारेण श्रीपतिना "रत्नमाला" ग्रन्थ: निर्मित: श्रीपते: काल: शक ९६१ यत: तत्पूर्वीय लल: इति सिद्ध: तथा एषां ग्रन्थे अयनचलनस्य नामापि नास्ति, अत: ब्रह्मगुप्तस्य समकालीन भवेदिति। एता सर्वा: वार्ता: विचार्य तेषां काल मह्यं अनुमानत: ५६० उचित: इति प्रतीयतते।

लल्लेण पूर्वोक्तबीजसंस्कारा: दृक्प्रत्ययेण स्वयं सिद्धकृत: अनेन सिद्धयति यत् लल्ल: स्वयं वेधकर्ता अन्वेषक: आसीत् तथा एतद् तेषां कृते भूषणास्पदवर्तते।

## भास्कराचार्य:

सिद्धान्तशिरोमणि एवं करणकुतूहल नामक द्वाभ्यां ग्रन्थाभ्यां स्वकीर्तिम् विदेशेषु विस्तारकर्त्ता भास्कराचार्य: स्वकीय सिद्धान्तशिरोमणि ग्रन्थे गोलाध्याये स्वजन्म शक विषये लिखति यत्-

**रसगुणपूर्णमही १०३६ समशकनृपसमये..भवन्ममोत्पत्तिः।**
**रसगुणवर्षेण मया सिद्धान्तशिरोमणि रचितः।।**

अनेन ज्ञापते यत् भास्कराचार्यस्य जन्मशकाब्दः १०३६ असीतिति। करणकुतूहल ग्रन्थारम्भ वर्षः ११०५ अर्थात् ६९ वयसी रचितः। तथा सिद्धान्तशिरोमणिग्रन्थः ३६ वर्षावस्थायां रचितः। सिद्धान्तशिरोमणेः ग्रहगणित एवं गोलाध्यायो..परि एषां स्वकीय वासनाभाष्य नामक टीकास्ति। टीकायां पाताधिकारे एकस्थाने भास्कराचार्येणलिखितम् तथा "शरखण्डकानि करणे मया कथितानि" तथा टीकायाँ अन्यस्थानेषु अयनांश एकादशः नीतः। अनेन टीकायाः रचनाकालः ११०५ परितः ज्ञापते, कारणं अयनांश एकादश ११०५ शकाब्दे मन्यते, किन्तु किञ्चित टीका पूर्व तथा किञ्चित् मूलग्रन्थेन सह एभिः लिखिता, इत्यापि सम्भवः। भास्कराचार्येण स्वकुल एवं निवासस्थानस्थ किञ्चित वर्णनं श्लोकेषु प्रदत्तः -

आसीत् सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने,
नानासज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रो द्विजः।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः,
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः।।६१।।
तज्जस्तच्चरणारविन्दयुगलप्राप्तप्रसादः सुधीर्मुग्धोद्
बोधकरं विदग्धगणकप्रीतिप्रदं प्रस्फुटम्।
एतद् व्यक्त सदुक्तियुक्तिबहुलं हेलावगम्यं विदां
सिद्धान्तग्रन्थनं कुबुद्धिमथनं चक्रे कविर्भास्करः।।६२।।

अनेन ज्ञायते यत् एषां गोत्रः शाण्डिल्य एवं निवासस्थान सह्य पर्वत सामीपस्थ विज्जडविड नामक ग्रामः। एषां पितुनामः महेश्वरः। तेषां पिताएव तेषां गुरुः आसीत्।

खानदेशे चालीसग्रामात् १० मील नैऋत्ये पाटण नामक ग्रामः अस्ति। तत्र भवानी देव्यायाः मन्दीरमस्ति। तन्मनतीरे एकः शिलालेखः अस्ति। तन् शिलालेखे लिखितम् यत् भास्कराचार्यस्य पौत्र चंगदेव यादव वंशीय सिंघणराज्ञः ज्योतिषी आसीत्।अस्य सिंघम राज्ञः राज्य देवगिरीमध्ये शकाब्द ११३२ तः ११५९ पर्यन्तं आसीत् चंगदेवेन भास्कराचार्य एवं स्ववंशीय विद्वांशानां ग्रन्थानां अध्यापनार्थं पाटणे एकस्यमठस्य स्थापना कृता। सिंघणस्य माण्डलिक "भृत्यः" निकुम्भवंशीय सोइदेवेन शकाब्द ११२९ तमे वर्षे

अस्यमठस्य

निर्वाहार्थं स्व सम्पत्ति प्रदत्ता तथा तस्यभ्राता हेमादीना अपि धनं प्रदत्तम्। चंगदेवे
११२८ शकाब्दात् केचन वर्षानन्तरं लेखोयं लेखितः। अद्यत्वे मठंतु नास्ति किन्तु मठस्य
चिन्हानि प्रप्यन्ते अस्मिन् शिलालेखे भास्कराचार्यस्य पूर्वापर पुरुषाणां वृत्तांतः अपि
दृरिदृश्यते। तद्यथा-

खानदेशे चालीसग्रामात् दशमील उत्तर गिरणस्य समीपे वहालनामक एक ग्राम
अस्ति। तत्र साजदिव्यायाः मन्दिरे..पि एकः शिलालेख अस्ति। तदनुसार शाण्डिल्यगोत्री
मनोरथस्य पुत्र महेश्वरः अभूत्। तेषां पुत्रः श्रीपतिः अभूत्। तेषां पुत्रः गणपति तथा
गणपतेः पुत्र अनन्तदेव अभूत्। अनन्तदेवः यादव वंशीय सिंघण राज्ञः दरवारे दैवज्ञाग्रणि

शाण्डिल्यवंशे कविचक्रवर्ती त्रिविक्रमो..भूत् तनयो..स्य जातः
यो भोजराजेन कृताभिधानो विद्यापतिर्भास्करभट्टनामा।।
तस्माद्गोविन्दसर्वज्ञो जातो गोविन्दसंनिभः।
प्रभाकरः सुतस्तस्मात् प्रभाकर इवापरः।।
तस्मान्मनोरथो जातः सतां पूर्णमनोरथः।
श्रीमान् महेश्वराचार्यस्ततो..जनि कवीश्वरः।।
तत्सूनुः कविवृन्दवन्दितपदः सद्वेदविद्यालता-
कन्दः कंसरिपुप्रसादितपदः सर्वज्ञविद्यासदः।
यच्छिष्यैः सह को..पि नो विदितुं दक्षो विवादी क्वचि-
च्छ्रीमान् भास्करकोविदः समभवत् सत्कीर्तिपुण्यान्वितः।।
लक्ष्मीधराख्यो..खिलसूरिमुख्यो वेदार्थवित् तार्किकचक्रवर्ती।
क्रतुक्रियाकाण्डविचारसारो विशारदो भास्करनन्दनो..भूत्।।
सर्वशास्त्रार्थदक्षो..यमिति मत्वा पुरादतः।
जैत्रपालेन यो नीतः कृतश्च विबुधाग्रणीः।।
तस्मात् सुतः सिंघणचक्रवर्ती दैवज्ञवर्यो..जनि चङ्गदेवः।
श्रीभास्कराचार्यनिबद्धशास्त्रविस्तारहेतोः कुरुते मठं यः।।
भास्कररचितग्रन्थाः सिद्धान्तशिरोमणिप्रमुखाः।
तद्वंश्यकृताश्चान्ये व्याख्येया मन्मठे नियतम्।।

आसीत्। तैः ११४४ शकाब्दे अस्याः देव्यायाः मन्दीरस्य निर्माणं कारितम्। एतत् शिलालेख
अपि तेषामेव। एतद् वंशवर्णनं चंगदेवस्य लेखस्य वर्णनेन सह मिलति। अनेन ज्ञापते
अस्मिन् कुले विद्वत् परम्पराबहुवर्षेभ्यः प्रचलिता। तथा कुलोयं बहुप्रतिष्ठितः आसीत्।

# केशव

ग्रहकौतुकम्, वर्षग्रहसिद्धिः, तिथि सिद्धिः, जातकपद्धतिविवृति, सिद्धान्तवासनापाठः, मुहूर्त तत्वम्, कायस्थादि धर्म पद्धति, कुण्डाष्टक लक्षणम्, ताजिक पद्धति, गणितदीपिका इत्यादि ग्रन्थादि कर्त्ता स्वज्ञान विशिष्टता एकिग्रन्थैः अस्मान् प्रर्दशयति केशवः। एवः केशवः प्रसिद्ध ज्योतिषि ग्रह लाघवकार गणेश दैवज्ञस्य पिता एवं कमलाकरनन्दन वैद्यनाथ शिष्यापि आसीत्। ग्रहकौतुक नामक षां करण ग्रन्थः अस्ति। तस्य आरम्भ वर्ष शक् १४१८ अस्ति।
अतः एषांकालः एतत् परितः। मुहूर्त तत्वस्य अन्ते एभिः लिखितम्-

.... गुरुवैजनाथचरणद्वन्द्वे रतः केशवः।
नन्दिग्रामगतः सुतस्तु कमलज्योतिर्विदग्रस्यः।

अतः एते नन्दिग्राम निवासी इति सिद्धः। तेषां ग्रन्थनामानि तत् तनयेन गणेशेन मुहूर्ततत्वदीपिकायां स्ववचनेन उक्तानि-

सोपायं ग्रहकौतुकं खगकृतिं तच्चालनाख्यं तिथेः
सिद्धिं जातकपद्धतिं सविवृतिं तार्तीयके पद्धतिम्।
सिद्धान्ते..प्युपपत्तिपाठनिचयं मौहूर्त्ततत्वाभिधं
कायस्थादिजधर्मपद्धतिमुखं श्री केशवार्यो..करोत्।।

ग्रहकौतुकतट्टीकावर्षग्रहसिद्धितिथिसिद्धिग्रहचालनगणितदीपिका-
जातकपद्धतितट्टीकाताजिकपद्धतिसिद्धान्तपाठकायस्थाद्याचारपद्धति -
कुण्डाष्टलक्षणादिग्रन्थजातनिबन्धानन्तरमहं केशवो मुहूर्ततत्वं वक्ष्ये।

अनेन एषां ग्रन्थानां नामानि प्रामाण्यम् च प्राप्यते। गणेश दैवज्ञ विरचित बृहत्तिथिचिन्तामणिस्थ वचनानुसारेण ग्रहकौतुक अनन्तरम् षष्ठीमितेब्दे गणेशेन ग्रहलाघवम् कृतम्। ग्रहलाघवस्य आरम्भः १४४२ मितशकः। अतः केशवस्य जन्मशकः १३७८ समायाति। केशवेन मुहूर्ततत्वे पूर्वखण्डे गर्भाधानादि संस्कारमुहूर्ताः तथा उत्तरखण्डे संहितावत् चारवशेन शुभाशुभ लक्षणानि सम्यक् वर्णितानि। अस्य जातक पद्धति

पद्धति एवं ताजिकपद्धति ग्रन्थः सम्प्रति प्रसिद्धः। मुहूर्तमार्तण्ड नामक ग्रन्थे केशवीजातक पद्धति निर्माण शकः १५२५ इति काशीस्थ रंगनाथेन दर्शितः। सूर्यसिद्धान्त टीकायां मुहूर्ततत्वस्य उल्लेखात्। अनेन ज्ञापते केशवस्य ग्रन्थानां प्रचारः तत्काले केचन् दिनेषु एव जातः।

गणेशेन तेषां बहुग्रन्था दर्शिता तथा..पि वेधविषयक तेषां योग्यता ग्रकौतुकेन संज्ञायते। ग्रहकौतुकस्य स्वकीय मिताक्षरा टीकायां लिखितः -

ब्राह्मार्यभटसौराद्येव्वष्टापि ग्रहकरणेषु बुधशुक्रयोर्महदन्तरं अंकतया दृश्यते। मन्दे आकाशे नक्षत्रग्रहयोगे उदये..स्ते च पञ्चभागा अधिकाः प्रत्यक्षमन्तरं दृश्यतं। ...एवं क्षेपेष्वन्तरं वर्षभोगेष्वपि अन्तरमस्ति। एवं बहुकाले बह्वन्तरं भविष्यति। यतो ब्राह्माद्येष्वपि भगणानां सावनादीनाञ्च बह्वन्तरं दृश्यते। एवं बहुकाले बह्वन्तरं भवत्येव। ...एवं बह्वल्तरं भविष्यैः सुगणकै। नक्षत्रयोगग्रह्योगोदयास्तादिभिर्वर्तमानघटनामवलोक्यन्यूनाधिकभगणाद्यै- र्ग्रहगणितानिकार्याणि। यद्वा तत्कालक्षेपकवर्षभोगान् प्रकल्प्य लघुकरणानि कार्याणि। ...एवं मया परमफलस्थाने चन्द्रग्रहणतिथ्यन्ताद्विलोमविधिना मध्यश्चन्द्रो ज्ञातः। तत्र फल ह्रास- वृद्ध्यभावात्। केन्द्रगोलादिस्थाने ग्रहणतिथ्यन्ताद्विलोमविधिना चन्द्रोच्चमाकलितम्। तत्र फलस्य परमह्रासवृद्धित्वात्। तत्र चन्द्रः सूर्यपक्षात् पञ्चकलोनो दृष्टः। उच्चं ब्रह्मपक्षाश्रितम्। सूर्यः सर्वपक्षे..पीषदन्तरः स सौरो गृहीतः। अन्ये ग्रहा नक्षत्रग्रहयोग्रहयोगास्तोदयादिभि- र्वर्तमानघटनामवलोक्य साधिताः। तत्रेदानीं भौमेज्यौ ब्राह्मपक्षाश्रितौ घटतः। ब्राह्मो बुधः। ब्रह्मार्यमध्ये शुक्रः। शविः पक्षत्रयात् पञ्चभागाधिको दृष्टः। एवं वर्तमानघटनामवलोक्य लघुकर्मणा ग्रहगणितं कृतम्।

एषां वेधदिवस एवं वेधद्वारा ग्रहानयन प्रकारः इत्यादि टीकाद्वारा ग्रहानयने सुलभता भवति। तादृशि-टीका अधुना अन्यज्योतिर्विद्वद्भिः न लिखिता।

# गणेशः

गणेशस्य पितुर्नाम केशवः। पिता एव तेषां गुरुः। तेषां मतुर्नाम लक्ष्मी। अयं गणेशः गणेशावतारः इति भारतवर्षे कथ्यते। चिराज्ञनश्रुतिः अनुसारं अनेन गणेशेन त्रयोदशवर्षस्य वयसि "ग्रहलाघवम्" नामकग्रन्थः चक्र। ग्रहलाघवस्य काल ग्रहलाघवीय अहर्गणानयनात् १४४२ शकः। अतः गणेशस्य जन्मशक १४२९ इत समायाति। गणेशः गणिते तु अत्यन्तप्रवीणः। ज्योर्तिविद्गणेशस्य पाण्डित्यं, तत्कृता कल्पादरर्हगणस्य खण्डत्रयं कृत्वा ग्रह साधनमित्यस्य ग्रहलाघवे कल्पना प्रकटयति। सा कल्पना आदरणीया वस्तुतस्तु सर्वगणकमान्या पूर्वाचार्यस्पृष्टा च। गणेशेन् कृतग्रन्थाम् नामानि, गणेशस्य भ्रातृपुत्र नृसिंहज्योतिर्विदा स्वकृत् ग्रहलागवटीकायांदाभ्यां श्लोकाभ्यां कथयति। तथा-

**कृत्वादौ ग्रहलाघवं लघुबृहत् तिथ्यादि चिन्तामणिं।**
**सत्सिद्धान्तशिरोमणेश्च विवृतिंलीलावतीव्याकृतिम्।।**

**श्रीवृन्दावनटीकिकां च विवृतिं मौहर्ततत्वस्य वै**
**सच्छ्राध्धादिविनिर्णयं सुविवृतिं छन्दोर्णव्याख्यस्य वै।।**

**सुधीञ्जनं तर्जनीयन्त्रकश्च सुकृष्णाष्टमीनिर्णयं होलिकायाः।**
**लघूपाययातांस्तथान्यानपूर्वान् गणेशो गुरुर्ब्रह्मनिर्वाणमायत्।।**

इति लेखेन ज्ञापते यत् ग्रहलाघवम् लघुतिथिचिन्तामणि बृहत्तिथिचिन्तामणिः सिद्धान्तशिरोमणिटीका, लीलावती टीका, विवाहवृन्दावन टीका, मुहूर्ततत्वटीका, श्रद्धादि निर्णयः, छन्दोर्णवटीका, सुधीरञ्जनी, तर्जनीयन्त्रम्, कृष्णाष्टमीनिर्णयः, होलिकानिर्णयः, इत्यादि ग्रन्थाः गणेशेन रचिताः इति। एषु ग्रन्थेषु ग्रहलाघवम्, लघुतिथिचिन्तामणिः, बृहत्तिथिविचिन्तामणि, लीलावती, विवाहवृन्दावन, मुहुर्ततत्वटीका एते ग्रन्थाः प्रसिद्धाः, मुद्रिताश्च। यतः सुलभतया प्राप्यन्ते। किन्तु ग्रन्थान्याः बहुनायासेन प्राप्यन्ते। विवाहवृन्दावनटीकायां सः स्वयमेव कथयति यत्-

**कृत्वादौ ग्रहलाघवाख्याकरणं तिथ्यादिसिद्धिद्वयं**
**श्लोकैः श्रद्धविधिं सवासनतया लीलावतीव्याकृतिम्।**
**सप्रक्षेपमुहूर्ततत्वविवृतिं पर्वादि सन् निर्णयं**
**तस्मान्मंगलनिर्णयाद्यथ कृता वैवहसद्दिपिका।**

एतद्अतिरिक्तं पर्वनिर्णयो..पि तस्य ग्रन्थत्वेन स्मृतः। ग्रहलाघवमस्याद्यो ग्रन्थः पर्वनिर्णयश्च चरमः। ग्रहलाघवे १४४२ शक उपक्रमवर्षत्वेन गृहीतः। लघुचिन्तामणिः १४४७ तमे शके रचितः, लीलावती टीका १४६७ शके, पातसारणी १४६० शके, विवाहवृन्दावनटीका तेन १५०० शके प्रणीता।

ज्योषिविषये गणेशेन स्वसुविपुलं ज्ञानं ग्रहलाघवे प्रदर्शितः। ग्रहसाधनविषये तेनोक्तम्-

"सौरो..र्को..पि विधूच्चमंकलिकोनाब्जो गुरुत्व्यार्यजो..सृग्राहू च कुजज्ञकेन्द्रकमथार्थः सेषुभागः शनिः। शौक्रं केन्द्रमजार्यमध्यगमितोमे यान्ति दृक् तुल्याम्।"

अर्थात् सौरसिद्धान्तात् सूर्याचन्द्रमसौ दृग्गणिततुल्यौ भवतो यदा तत्र चन्द्रमसि नवकलाः शोधिता भवन्ति। आर्यपक्षीयकरणप्रकाशानुसारेण भौमराहू तथैव शनिश्च यदि तत्र पाण्डवांशाः संयोजिताः। ब्राह्मपक्षीयकरणकुतुहलतः बुधकेन्द्रं तथैव। गणेशः ग्रहसाधनाय ४०१६ दिनानामेकं अहर्गणचक्रं मन्यते, तेन गणितकरणे सरलता भवति। गणेशः ज्याचापं विनैव गणितं साधयति।

गणेशदैवज्ञेन सरलतमयुक्त्या गणितं सर्वसुलभं कृतं किन्तु तेन सिद्धान्तज्योतिषाध्ययनवेधादीनां तु प्रायः लोपैव चक्र। अयमाचार्यो जातकालंकारप्रणेता गणेशाद्भिन्नः।

# कमलाकरः

"सिद्धान्त तत्वविवेक" कमलाकरकृत सिद्धान्त ग्रन्थो..स्ति। कमलाकरस्य जन्मशक १५३० अनुमीयते। "सिद्धान्ततत्वविवेक" अनेन १५८० शकाब्दे काश्याम् रचितः। कमलाकरः पूर्णतया वर्तमान सूर्यसिद्धान्तस्य अनुयायी वर्तते। यतः तत्वविवेके भगणादिमान तैः सूर्यसिद्धान्तादेव नीतः। सूर्यसिद्धान्तस्य केषां चित् श्लोकाः तैः अक्षरशः नीताः। तत्वविवेकेमध्यम, स्पष्ट, त्रिप्रश्न, बिम्ब, छाया, श्रृंगोन्नति, उदयास्त, पर्वसम्भव, चन्द्रग्रहण, सूर्यग्रहण, भग्रहयुति, पात, महाप्रश्न इति त्रयोदशाधिकाराः तथा भिन्न-भिन्न वृत्तेषु मिलित्वा ३०२४ पद्याः सन्ति। मध्ये गद्यः अपि बहुत्र प्राप्यते। ग्रन्थस्य केषाञ्चित् विषयाणां सूर्यसिद्धान्त उपपत्तिः अन्ते शेषवासना नामक प्रकरणे दत्ता। अस्य ग्रन्थस्य काश्यां प्रकाशनम् सुधाकर द्विवेदीना कृतम्।

कमलाकरेण स्वकीयसिद्धान्ते बहुत्र तादृशी नवीनता दर्शिता या तत्पूर्वीय सिद्धान्तेषु न प्रप्यते तद्यथा कमलाकरेण लिखितः यत् सम्पातगतित्वात् ध्रुव नक्षत्र अस्थिरः अस्ति तथा सम्प्रति यत् ध्रुवतारा दृश्यते तद् स्थिरध्रुवस्थाने नास्ति। पूर्वोत्तरात्र्यों ध्रुवताराया: स्थानं भिन्नभिन्नमिति। एषां कथमस्ति यत् यवनमतानुसारेण धरायाः सर्वादिक पृष्ठभागे जलं व्याप्यमस्ति तथा किञ्चित्भागः बहिः अस्ति। कस्मादपि याम्योत्तरवृत्तात् पूर्वापर अंशात्मक अन्तराय समप्रति रेखांशः इत्युच्यते। किन्तु कमलाकरेण तं तूलांशः इत्युक्त्वा विषववृत्तवर्ती खालदत्तनामक नगराय मुख्य याम्योत्तरवृत्तं मत्वा २० नगराणां अक्षांश तथा रेखांशाः दत्ताः। तद्यथा-

| | अक्षांश | तूलांश | | अक्षांश | तूलांश |
|---|---|---|---|---|---|
| काबुल | ३४।४० | १०४।० | अहमदाबाद | २३।० | १०८।२० |
| खमबायत | २२।२० | १०९।२० | बरारपुर | २१।० | १११।० |
| उज्जयिनी | २२।१ | ११२।० | लाहौर | ३१।५० | १०९।२० |
| इन्द्रप्रस्थ | २८।१३ | ११४।१८ | अर्गलापुर | २६।३५ | ११५।० |

| | | | | | |
|---|---|---|---|---|---|
| सोमनाथ | २२।३५ | १०६।० | बीजपुर | १७।२० | ११८।० |
| काशी | २६।५५ | ११७।२० | गोलकुण्डा | १८।४ | ११४।१९ |
| लखनऊ | २६।३० | ११४।१३ | अजमेर | २६।५ | १११।५ |
| देवगिरि | २०।३० | १११।० | मुलतान | २९।४० | १०७।३५ |
| कन्नौज | २६।३५ | ११५।० | माण्डव | २७।० | १२१।० |
| कश्मीर | ३५।० | १०८।० | समरकन्द | ३९।४० | ९९।० |

तुरीयतन्त्रेण वेधकरणस्य विस्तृतविधिः अनेन लिखितः। त्रिप्रश्नाधिकारे एवं ग्रहणाधिकारे विशेषतः नवीवप्रकाशः दत्ताः। तेन लिखितः यत् सूर्यग्रहणसमये चन्द्रपृष्ठनिवासीभ्यः पृथ्वीग्रहण दृश्यते तथा यवनैः शुक्र कृत सूर्यबिम्बभेदः दृष्टः। मेघ, हिमवर्षा, भूकम्प, एवं उल्कापात् इत्यादिनां कारणाः दृर्शिताः, तेन तु पूर्णरूपेण सत्याः, तथापि विश्वसनीयाः सन्ति, यतः एते वास्तविक कारणेनसह सन्निकटाः। अंकगणित - रेखागणित, क्षेत्रविचार तथा ज्यासाधन सम्बन्धी नवीन प्रकाराः एषां ग्रन्थेषु प्राप्यते। अन्यसिद्धान्तेषु ३४३८ त्रिज्यामत्वा प्रतिपादोनचत्वार अंशस्य भुजज्याः दर्शिताः, किन्तु अनेन ६० त्रिज्यां मत्वा प्रति अंशस्य भजज्याः दर्शिताः। अनेन गणितकरणे सुविधा जायते।

कमलाकरस्थ ज्येष्ठ बन्धु दिवाकरः एवं तेषां गुरुः। कमलाकरः "सिद्धान्त सार्वभौम" कार, मुनीश्वरस्य समकालिक विरोधि च ग्रहस्पष्टीकरणार्थं निर्मितः भंगीरीतेः कमलाकरस्यानुजः रंगनाथेन भंगी विभंगी नामेन खण्डनं कृतम् किन्तु मुनीश्वरेण प्रतिखण्डनमपि कृतम्।

## २. सौरसिद्धान्तस्यैतिहासिकत्वम् -

ज्योतिषशास्त्रम् वेदेषु नेत्रत्वेन स्वीक्रियते। अस्यशाश्त्रस्य प्रादुर्भावः अनादिकालदेव सततम् निरन्तरम् अद्यावधि प्रचलति। प्रणेतास्य स्वीक्रियते विद्वद्भियत् शास्त्रस्य प्रादुर्भावः सूयदिवभूतः। यथा-

**तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने।**
**ग्रहाणां चरितं प्रदान्मयाय सविता स्वयम्।।सूति.म.४।।**

स्वयमेव सूर्येणोक्तम् यत्, हे मयासुरतवमनोरथः ज्योतिषशास्त्रजिज्ञाशारूपः मया विदितः ततः कथितो..पि च विषयेस्मिन् वैदिक वाङ्मये सूर्येणैवबहुविधरूपेण अनेकानां शास्त्राणां स्वमुखात् भिन्न-भिन्न शिष्येभ्यः प्रदत्तः। तेषु शास्त्रेस्व..पि इदमपि गृहितम्। सूर्यस्य ज्योतिष शास्त्रीय ज्ञानम् प्रसिद्धम् इति। यथा -

**सूर्यः पितामहो व्यासो वशिष्ठो..त्रि। पराशरः।**
**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।**
**रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**
**शौनको...ष्टादशाश्चैते ज्योतिः शास्त्रप्रवर्तकाः।।कश्यप संहिता।।**

इतयेतैः आचार्यभिः ज्योतिषस्यविकासः कृतः किन्तु कालान्तरे च अनेके ग्रन्थाः सूत्राणि च कालकवलीभूताः संजाता। अयमेव सूर्योक्त ज्यौतिष सिद्धान्तः पश्चात् सौरसिद्धान्त रूपेण प्रचलितः। सूर्यस्य पर्याय रूपेण भास्करः, अरुणः, हिरण्यगर्भः इत्यादिनाम्नैः प्रसिद्धिमवाप। भगवान भास्करेण स्वयमेवनैकानां रहस्यानां समुद्घाटनम् कृतमिति। यथा -

**श्रृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम्।**
**युगे युगे महर्षिणां स्वमेव विवस्वता।।**
**शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः।**
**युगानां परिवर्तेन कालभेदो..त्र केवलः।।सू.सि.म.८,१।।**

अयमेव सूर्यसिद्धान्तः ज्योतिषशास्त्रस्य सिद्धान्तरूपेण, ज्ञानभास्कररूपेण सौर

ज्योतिषरूपेण च स्वीकृतः। बहुकालान्तर इदमेव ज्यौतिषसम्बन्धि सूर्यरहस्यं हस्तलिखित रूपेण अनेकैः ज्योतिषविद्वद्भिः स्व-स्व कालानुसारेण सुरक्षितं कृतमिति। ततः इदं शास्त्रं हि ज्ञानभास्कररूपेण अनेकेषु स्थलेषु हस्तलिखितरूपेण प्राप्यतेति। यथा-तञ्जौर पुस्तकालये (मद्रास), प्रच्यविद्यामन्दिरे (वटोदर) सरस्वतीभवने च(वाराणसी) इत्यादिषु स्थाने, अप्रकाशित रूपेण प्राचीन लिप्यां अद्यत्वे..पि विद्यते।

**ज्ञानभास्करः -**

यथापूर्वमेव ज्ञातम् यत् ज्योतिष शास्त्रम् ब्रह्माविनिर्माय नारदाय प्रोवाच। नारदऋषिरपि अस्य महत्वं अंगीकृत्य संसारे प्रर्वतयामास। इदं सौरशास्त्रम् मयाश्वरेण भिन्न-भिन्न क्षेत्रे जगति प्रवर्तितम्। मयेनैवानेन वास्तुशास्त्रम् अपि लिखितम् यन्नानामयमतमे अस्ति। सूर्यतः प्राप्य ज्योतिषस्य अनेकानि रहस्यानि सन्दर्भ विषयकानि उद्घाटितानि ज्योतिर्विद्भिः। यथोक्तम् भट्टोत्पलेन -

अन्येपि विद्वांशः प्रकाशितः। वाराहमिहिरेणापि ज्योतिषविद्यापरम्पराविषये अनेकेषु स्थलेषु उल्लिखितः। ततः प्रभृति आरभ्य इदमेव सौरशास्त्रम् (ज्योतिषम्) भिन्न-भिन्न विद्वद्भिः स्व-स्व समयानुसारेण संगृह्य, अन्यनाम्ना..पि ग्रन्थरूपेण लिखितः, उद्घाटितः प्रकाशितश्च।

सौरसिद्धान्तस्य अपरनाम ज्ञानभास्कर अपि। अयमेव ज्ञानभास्करः अनेकेषु खण्डेषु विविध प्रकरणात्मकेषु सम्प्रति प्राप्यन्ते। एकस्मिन् खण्डे अनेकानि प्रकरणानि सन्ति। तस्मात् प्रकरणत्रयमिदम् मया स्वीकृतम्।

अत्र

१. षडवर्ग फलकथनम्
२. होराशास्त्रे कर्मविपाक फलकथनम्
३. मेषादि द्वादश लग्नानां फलकथनम्।

इमानिप्रकरणानि ज्ञानभास्करोक्तानि। प्रथमे षड्वर्गप्रकरणे सूर्यारूण संवादरूपेण ज्योतिषफलरहस्यं कथितम्। अयमेव सूर्यारूण संवादः ज्ञानभास्करोक्तः इति हस्त प्रतिलिप्यां उत्टंकितः।

ज्ञायतेयत् ज्ञानभास्कर नाम्नायोग्रन्थः आसीत् तद् वृहद्रूपेण भवेत्। कालान्तरे खण्डरूपेण छिन्नभिन्नश्च जातः। यस्कस्या..पि विश्वविद्यालयस्य पुस्तकालये सुरक्षितः वर्तते। तत् पठनादेव ज्ञायते पारम्पर्येण आनुपूर्वेणच लेखन कार्यं कृतमिति। आलोच्य प्रकरणत्रयस्या..पि इदमेव रहस्यम्। प्रकरण पर्यन्ते च उल्लेखः प्राप्यते यत् -

ध

हस्तलिखितग्रन्थानां आलोडने यल्लिप्यां अयंग्रन्थः प्राप्यते सः सप्तदशकस्य प्रतीयते किन्तु तेनोक्तं यत् ग्रन्थोयं मया पठनार्थ भर्तृ श्री नारायणदासेन प्राप्ताः। तदेव उल्लेखः कृतः। अनेन ज्ञायते प्राचीनो अयं ग्रन्थः नैकेषुखण्डेषु विभक्तः यत्र-तत्र संगृहीतः तथाप्यस्य उपयोगिता ऐतिहासिकता अनिवार्यता च ज्यौतिषशास्त्रे अस्तेव इत्थं संचिन्त्यैव अनुसन्धानस्यकृते स्वीक्रियतेति।

## २. सिद्धान्तकालिकज्योतिषस्य स्वरूपम् -

भास्कराचार्येण यदुक्तम् यत् -

वेद चक्षु: किलेदं स्मृतं ज्यौतिषं मुख्यताचाङ्गमध्येतेनोच्यते। इति विषयानुशाशनमात्रम् शास्त्रं आचार्यविशेष: कर्तृक:। निश्चित् शब्दानु पूर्विक: ग्रन्थ: ज्योतिषग्रन्थ: ज्योतिष ग्रन्थ: कथ्यते। शास्त्रेस्मिन् विभागत्रयम् स्वीकृतम्। यथा - सिद्धान्त-संहिता-होरा शब्देनेति। अत्र सिद्धान्तपदेन सिद्धान्तस्कन्ध: स्वीकृत:। इमं स्कन्धमाश्रित्य आर्यभट्टस्य प्रथमोग्रन्थ: स्वीक्रियते। सूर्यसिद्धान्त: नारदसंहिता काश्यपसंहिता, सोमसिद्धान्त: इत्यादिग्रन्थास्तु आर्षत्वेन प्रसिद्धासन्ति। तत: एतेषां ग्रन्थानामनन्तरं आर्यभट्टस्य आर्यभट्टीयम्, लल्लस्य शिष्यधीतन्त्रम्, वाराहमिहिरस्य पञ्चसिद्धान्तिका, ब्रह्मगुप्तस्य स्फुटसिद्धान्त, भास्कराचार्यस्य सिद्धान्तशिरोमणि, नीलकण्ठस्य सिद्धान्तदर्पण:, कमलाकरस्य सिद्धान्ततत्तवविवेक: - इत्यादिनां ग्रन्थानां कालानुसारेण प्रसिद्धीं अवाप: समासेनात्र स्वरूपविषयकं वर्णनं एतादृशं आसीत्।

**आर्यभट्टीयम् (आर्यभट्टकृत) -**

शास्त्रस्यास्य वार्तातु वेदेष्व..पि उपलभ्यते। यथायथं विकसीतंरूपं अपिमन्त्रेषु दृश्यते। यथा - सूर्याचन्द्रमसौधाता: - (ऋग्वेद) दिवं च पृथ्वीं च तत: ब्राह्मणग्रन्थेष्व..पि अस्य सन्दर्भा: उपलभ्यन्ते। यथा -

................युगे युगे विद्ध्यात्

एवमेवप्रकारेण कालान्तरे कालवाचकत्वेन वर्ष शब्द: माप शब्द सम्वत्सर सम्बन्धशब्दा: सन्दर्भा: प्राप्यन्ते।

अनेन यत् सिध्यति वैदिकसंहिताकाले सौरवर्षं प्रचलितं आसीत्। यथोक्तं ऋतुनां तु ऋतुनां हि सूर्यो योनि: इत्यादि।

ज्योतिषसिद्धान्तप्रणेतृषु आर्यभट्ट: प्रथमोपुरुष: अस्य ग्रन्थे ससंहिताकालिकज्योतिषस्य स्वरूपम् दृश्यते।

अहं हि महाभागः कुशुमपुरनिवासी असीत्। अपरे कथयन्ति, पाटलीपुत्रस्य आसीत्। अन्ये च मागधः एवं मन्यते अस्यग्रन्थः चतुर्षुभागेषु विभक्तः यथा -

1. J r{V H $m mX…

2. J { U V n mX…

3. H $mb {H ¶m mn mX…

4. J mb n mX ü ¢V , g d@mX ' mh Ë¶ 1 2 1 ûc mH $m.. g pÝV & {g Õ mÝV H $m{b H $

Á¶m¢V f oA ñ¶ à Y mZ §ñW mZ §d V © &

## २. लल्लस्य धीवृद्धि तन्त्रम् -

लल्लो हि भट्दीपिकाकारपरमादीश्वरमतानुसारेण आर्यभट्टस्य शिष्यः समानवयस्कश्चासीत्। किन्तु तस्यैव हि स्वप्रणीतगणिताध्यायसमाप्तौ -

.........आर्यभटाभिधानसिद्धान्ततुल्यफलमेतदकारितन्त्रम्।.. इति कथनात् तदध्यायारम्भे -

**विज्ञाय शास्त्रमलमार्यभटप्रणीत -**

**तन्त्राणि यद्यपि कृतानि तदीयाशिष्यैः।**
**कर्मक्रमो न खलु सम्यगुदीरितस्तैः।**
**कर्म ब्रवीम्यहमतः क्रमशस्तु सूक्तम्।।**

लल्लः तीक्ष्णमतिर्वेधकर्ता....सीत्। यथा स दृष्टवान् यदार्थसिद्धान्तेन तादात्यप्रक्रिया नैव संवदते तदा तेन तत्र बीजसंस्कारो..र्पितः। स न हि ब्रह्मगुप्त इव आर्यसिद्धान्तालोचको - ..पितु तस्य संस्कारक एव।

धीवृद्धिदतन्त्रे हि भगणादिमानं सर्वमेव आर्यभटमानसंवादि केवलं तद्बीजसंस्काराहितमेव। अयनचलनविषये लल्लसिद्धान्तमपि मौनमालम्बते।

## वाराहमिहिर (पञ्चसिद्धान्तिका) -

वराहमिहिरेण पञ्चसिद्धान्तिकायां गणिस्कन्ध सम्बन्धि वर्णनं कृतमस्ति बृहत्जातकस्य प्रथमध्याये वक्रानुवक्रस्तमय.........। तथा वृहत्तसंहितायाः युद्धं यदा यथा -

उभयत्र वक्र अनुवक्र अस्त एवं उदय इत्यादिनां वर्णनं मया करणग्रन्थे कृतमस्ति इति कथयति। तथा एतेषां विषयाणां वर्णनं पञ्चसिद्धान्तिकायां प्राप्यते। अनेनकारणेन तथा अन्यप्रमाणैः सिद्ध्यतियत् एषां करणग्रन्थः पञ्चसिद्धान्तिका एव अस्ति। किन्तु तैः स्वयं अस्य ग्रन्थस्य नाम पञ्चसिद्धान्तिका इति कुत्रा..पि न लिखितः।

**अष्टादशभिर्बध्द्वा ताराग्रहतन्त्रमेतद्धयार्यैः।**
**भजते वराहमिहिरो ददाति निर्मत्सरः करणम्।।प.सि.अ.१८।६५।।**

अत्र येनम् करण एव तन्त्रम् कथितम्। पञ्चसिद्धान्तिकायां अन्यत्रा..पि येनम् करण वा तन्त्रकथितमस्ति। किन्तु उत्पलः पञ्चसिद्धान्तिका एव कथयति। कारणं अस्तियत् ग्रन्थकारेण ग्रन्थेस्मिन् पञ्चसिद्धान्तानां अनुवादं कृतम्। अस्मिन् ग्रन्थे, ब्रह्मसिद्धान्त, सूर्यसिद्धान्त, पौलिशसिद्धान्त, रोमक तथा वशिष्ठ सिद्धान्तानां संग्रहः सादाहरणं प्रदत्तः। एषां वराहस्य प्रथम कृतिः। अस्य. रचना कालः ५०५८ शकाब्दः मन्यन्ते विद्वांशः।

**ब्रह्मस्फुट सिद्धान्त -**

गुर्जर प्रान्तस्य श्रीमालग्रामस्य निवासी विष्णुनामक ब्राह्मणस्य पुत्रः अयं ब्रह्मगुप्तः। अयं ब्रह्मगुप्तः वेदकुशलः महान् ज्योतिषि च। ब्रह्मगुप्तस्य सिद्धान्तग्रन्थः ब्राह्मस्फुट सिद्धान्त नाम्ना उपलभ्यते। खण्डखाद्यकम्नामककरण ग्रन्था..पि ब्रह्मगुप्तस्यैव ५२० तमे शकाब्दे उत्पन्नः ब्रह्मगुप्तेन स्वकीय त्रिंशत् वर्षावस्थायां अर्थात् ५५० तमे शकाब्दे ब्राह्मस्फुट सिद्धान्तस्य रचनाकृता। ब्राह्मस्फुट सिद्धान्त पश्चात् केना..पि को..पि नूतन सिद्धान्तः न रचितः।

ब्रह्मसिद्धान्तानुसारेण अन्तकालेकदापि सर्वे..पि मध्यम ग्रहाः एक विन्दावेष्यति। सिद्धान्तोयं ग्रहचारारम्भं कल्पारम्भादेव मन्यते। यदा सूर्यसिद्धान्त कल्पारम्भानन्तरमेव मन्यते। ब्रह्मसिद्धान्तस्य वर्षमानमार्यसिद्धान्ततः ५२.५ विपलातो न्यूनं मूलसूर्यसिद्धान्ता ६७.५ विपलातः। अयं सिद्धान्तः विषुव दिने मेष संक्रान्ति मन्यते। तत् तु १९१२ शकाब्दे चैत्रकृष्णनवम्यां घटते तदेव कथयति ब्रह्मगुप्तः -

**यदि भिन्नाः सिद्धान्ताः भास्करसङ्क्रान्तयो..पि भेदसमाः।**
**स स्पष्टः पूर्वस्यां विषुवत्यकोदियो यस्य।। इति।**

अनेन सिद्ध्यति यत् मेष संक्रान्ति आरम्भ गणना सायना-निरयना वा भवेत् कल्पादितः वा कल्पारम्भ भवेत्। किन्तु तस्य गणना क्षितिजस्य पूर्वविन्दौ साक्षात् सूर्योदयेन एव भवति।

**भास्कराचार्यस्य सिद्धानतशिरोमणिः -**

**रसगुणपूर्णमही १०३६ समशकनृपसमये..भवन्ममोत्पत्तिः।**
**रसगुणवर्षेण मया सिद्धान्तशिरोमणि रचितः।।**

अनेन ज्ञायते यत् भास्कराचार्यस्य जन्मः १०३६ तमे शकाब्दे आसीत्। तथा तैः स्वकीय ३६ वर्षाविस्थायां अर्थात् १०७२ तमे शकाब्दे सिद्धान्तशिरोमणि आख्यात ग्रन्थः विरचितः। सिद्धान्तशिरोमणिग्रन्थः चतुर्भागेषु विभक्तः। यथा - पाटीगणित, बीजगणित, ग्रहगणित, गोलाध्यायचेति। अस्यग्रन्थस्य प्रत्येकभागः पृथक्-पृथक् ग्रन्थरूपेण वर्तते। लीलावती नाम्ना पाटिगणित भागः विख्यातः। ग्रहगणित एवं गोलाध्याय उभयोर्ग्रन्थकत्रैव वासनाभाष्यं प्राप्यते। यस्यो..परि नृसिंहदैवज्ञेन वासनावार्तिकम् प्रणीतम्। अस्मिन् ग्रन्थे ब्रह्मगुप्तव्याख्यतं, ब्रह्मसिद्धान्तं, राजमृगाङ्कितस्तदुपरि बीज संस्कारं मुञ्जालतो..यनांशचलनश्च गृहीत्वा प्रणीतो..पि रचनावैशिष्टच्येन मौलिकग्रन्थतुलामारोहति। अस्मिन्ग्रन्थे कतिपयश्लोकाः व्यवहार प्रदीपनामक पद्मनाभकृतग्रन्थात् यथा-यथं गृहीताः सन्ति, किन्तु अस्य क्षतोपपत्तिवैचित्र्यात् मौलिकता न अस्य ग्रन्थस्य यावत्युः टीका लभ्यन्ते न तथा को..पि अन्य ग्रन्थस्य।

अनेन आचार्येण गणितज्योतिषस्य विस्तारः कृतः तथा सबुद्धियोगेन उपपत्तिश्च यत्र-तत्र साधिता।

**सिद्धान्ततत्वविवेक कमलाकरस्य : -**

सिद्धान्त ग्रन्थ वर्तते। एषां जन्मशक १५३० मन्यते। कमलाकरेण तत्वविवेकस्य रचना १५८० तमे शकाब्दे काश्यांकृता। ग्रन्थो..यं सूर्यसिद्धान्तस्य अनुयायिरूपः। ग्रन्थे..स्मिन् मध्यम, स्पष्ट, त्रिप्रश्न, बिम्ब, छाया, श्रृगोन्नति, उदयास्त पर्वसम्भव, चन्द्रग्रहण, सूर्यग्रहण, ग्रहयुति, पात महाप्रश्न इति त्रयोदश अधिकाराः तथा भिन्न-भिन्न छन्देषु ३०२४ पद्यानि लिखितानि। तन्नमध्ये बहुत्र गद्यपि समुपलभ्यते। कमलाकरेण

बहूनि नूतन संशोधनानि कृतानि तथा तन् विषये लिखितं यत् सम्पाते गतित्वात्, ध्रुवनक्षत्रः अस्थिरःअस्ति। तथा सम्प्रतियत् ध्रुवतारा दृश्यते तत् सम्पूर्णरूपेण ध्रुवस्थानेनास्ति। पूर्वरात्रौ एवं उत्र रात्रौ ध्रुवतारायाः स्थानं भिन्नः-भिन्नः वर्तते। कमलाकरेण तुरीयतन्त्रेण

वेधकरणस्य विस्तृत विधिः लिखितास्ति। त्रिप्रश्नाधिकारे एवं ग्रहणाधिकारे लिखितं अस्तियत् - सूर्यग्रहण समये चन्द्रपृष्ठनिवासिभ्यः पृथ्वीग्रहणं दृश्यते। मेघः, भूकम्पः, उल्कापात, कर्कापात, इत्यादिनां कारणानि निर्दिष्टानि। कामम् नैव पूर्णतः सत्यानि तथा..पि नैव नितान्तमेव वितथ्यानि। अनेन कमलाकरेण ३४३८ त्रिज्या स्थाने ६० त्रिज्याकल्पयित्वा गणिते बहुसरला विधि निर्दिष्टा या सुविधाजन्या। अनेन ज्ञायते यत् कमलाकरेण सिद्धान्ते विद्वत्तापूर्णज्ञानं अस्माभिः तत्त्वविवेकनामकग्रन्थेन प्रदत्तः।

# ४ ज्योतिषशास्त्रस्य प्रमुखतत्वानां विवरणम्

संस्कृतवांगमये अनेकानि शास्त्राणि प्रसिद्धानि सन्ति। तत्रा..पि कानिचित् धर्म परकानि कानिचित् अर्थपरकानि-

एवंप्रकारेण आहत्य इदं कथयितुं शक्यते यत् सर्वाणि शास्त्राणि येनकेनप्रकारेण चतुर्विध पुरुषार्थप्राप्तसाधनानि सन्ति। किन्तु सम्प्रतिलोके भोग्यरूपेण वास्तु-कर्म-ज्योतिष इत्यादीनि प्रथन्ते। सर्वेषां शास्त्राणां प्रमुखानि तत्वानि भवन्ति। तद्वदेव ज्योतिषशास्त्रस्या..पि प्रमुख तत्वानि सन्ति।

**तत्वशब्दार्थः :-**

तन्+क्विप् प्रत्ययेन तुकागमः पृषोदरादित्वात्-तत्वार्थ शब्दस्य सिद्धिर्भवति। अस्य अनेकार्थाः भवन्ति। यथा सत्यम्, मनः, सूर्यः, यथार्थः, तथ्यम्, मूलम्, प्रकृतिश्च इति। अत्रमूलप्रकृतिरूपेण एवम् तथ्यरूपेण च तत्त्व शब्दस्य अर्थः स्वीक्रियते। तर्हि अत्र प्रश्नः उदेतियत् ज्योतिषशास्त्रस्य कानि प्रमुखतत्त्वानि सन्ति। अत्र विचार्यते यथा- शरीरस्य अनेकानि तत्त्वानि भवन्ति, तथैव अस्यशास्त्रस्या..पि प्रमुख तत्त्वानि सन्ति यथा-

१. कालः
२. ग्रहाः
३. राशयः
४. नक्षत्राणि
५. योगाः

**१. काल :-**

अस्य अनेके भेदाः सन्ति। मुहूर्तरूपेण, अहोरात्रम्, लग्नम्, द्वादसादि भावाः, होरारूपेण, अयन, ऋतु, मास, वर्ष भेदेन च अत्र विविच्यते-

संस्कृत वाङ्मये कालस्या..पि अनेकार्थाः भवन्ति। किन्तु अत्र कालशब्दस्य "समय" अर्थः गृहते। न्यायशास्त्रे उक्तम् यत्-

(अतीतादि व्यवहारहेतुः कालः।) अयंकालः विभुः नित्यश्च भवति। ज्योतिषशास्त्रम् कालपरिमापकं एव शास्त्रम् अस्ति। अनेनकारणेन आर्यज्योतिषे यदुक्तंयत्-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद स ज्ञान्।।**

(आर्यज्योतिषम् श्लो. ७३)

अतो हि अस्यशास्त्रस्य प्रमुखंतत्त्वम् कालः अस्ति। तत्त्वमिदम् मौलिकत्वेन स्वीक्रियते। अस्य तत्त्वस्य अनेके भेदाः सन्ति।

ज्योतिषेकालमानान्तर्गते प्रथमं अखण्डदण्डायमानं व दृढ़ायमानं एवं द्वितीय कलनात्मको वा ज्ञानयोग्यम्। अस्य कलनात्मककालस्या..पि प्रकारद्वयं स्थूलः-सूक्ष्माश्च इति भेदः वर्णितम्। उक्तम् च-

**लोकानामन्तकृत्कालः कालो..न्यकलनात्मकः।**
**स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त्त उच्यते।। (सूर्यसिद्धान्त)**

कलनात्मकान्तर्गरगत नवविधकालवर्णनं वर्तते-

**ब्राह्मं द्विव्यं तथा पित्र्यं प्राज्यापत्यं गुरोस्तथा।**
**सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव।।**

पूर्वोक्त श्लोके प्रथमं ब्रह्ममानस्य वर्णनं वर्तते।

**१. ब्रह्ममानम् :-**

| | | |
|---|---|---|
| ब्रह्मण एकम् दिनम् | = | १ कल्पः |
| १ ब्रह्मरात्रि | = | १ कल्पः |
| ब्रह्म अहोरात्रम् | = | २ कल्पः |
| 360X२ = ६२० कल्पः | = | १ ब्रह्मवर्षम् |

| | | |
|---|---|---|
| ब्रह्मणः पूर्णायुः | = | १०० वर्षाणि |

**२. दिव्यमानम् :-**

"दिवि भवं दिव्यं" देव सम्बन्धीत्यर्थः अहोरात्रम् कथ्यते। त्रिंशत् सौरदिवसस्य एकसौरमासः भवति।

| | | |
|---|---|---|
| १२ सौरमासः | = | १ सौरवर्षम् |
| १ सौरवर्षम् | = | १ दिव्यअहोरात्रम् उच्यते। |

**३. पितृमानम् :-**

पितृमानम् चन्द्रमानस्य समादृशौवर्तते। कृष्णपक्षः पितृणां रात्रिः शुक्लपक्षः पितृणां दिवसश्च वर्तते। अतः

| | | |
|---|---|---|
| १ चन्द्रमासः | = | १ पितृअहोरात्रम् |
| ३० अहोरात्रम् | = | १ पितृमासः |
| १२ पितृमासः | = | १ पितृवर्षम् |

**४. प्राजापत्यमानम् :-**

प्रजापत्यादि मन्वन्तरस्यमान एव प्राजापत्यमान वर्तते। अत्र दिन रात्री व्यवस्था नास्ति।

**५. गुरुमानम् :-**

वृहस्पतिएकराशौ भ्रमणकाल एव गुरुमानं वर्तते। संम्वत्सरज्ञानम् गुरुमानतः ज्ञायते। "षष्ट्याब्दं ज्ञेयं बार्हस्पत्येन"।

**६. सौरमानम् :-**

सूर्यस्य १ अंशः परिभ्रमणकाल एव सौर दिवसः (सौर अहोरात्रम्) कथ्यते। ३० अहोरात्र = १ सौरमासः। १२ मासाः = १ सौर वर्षम् भवति।

## ७. सावनमानम् :-

सूर्योदयात् पुनः सूर्योदय पर्यन्तम् (द्वितीय दिने) कालः एव सावन दिनं (अहोरात्रम्) कथ्यते। त्रिंशत् सावनदिनानाम् एक सावन मासः भवति। तथा च द्वादश सावन मासस्य १ सावन वर्षम् भवति।

## ८. चान्द्रमानम् :-

दर्श अमावस्यातः द्वितीय अमावस्या पर्यन्त कालः चान्द्र मासः कथ्यते। ग्रन्थान्तरे पूर्णिमातः द्वितीयपूर्णिमा पर्यन्तकाल एव चान्द्रमास कथ्यते। द्वादश चान्द्रमासस्य १ चान्द्रवर्षम् भवति।

## ९. नक्षत्रमानम् :-

| | | |
|---|---|---|
| ६ प्राणः | = | १ पलः |
| ६० पलानि | = | १ घटिका |
| ६० घटिका | = | १ नक्षत्रअहोरात्रं भवति। |

३० नक्षत्राणि अहोरात्रस्य एक नक्षत्रमासः भवति। एवं द्वादश नक्षत्रमासानाम् एक नक्षत्रवर्षं भवति।

## ब्रह्ममानान्तर्गत वर्षप्रमाणम् :-

| | |
|---|---|
| ३६० सावनदिनानि | = १ सावनवर्षं व तदेव १ दिव्य दिनम् |
| ३६० दिव्यदिनानि | = १ दिव्यवर्षम् |
| १२००० दिव्यवर्षाणि | = १ महायुगम् |
| ७१ महायुगाः | = १ मन्वन्तरः (तदेव १ मनुः) |
| १४ मनुः + १५ सन्धयः | = १ कल्पम् |

पूर्वोक्त नवविधकालमानान्तरगते प्रमुखरूपेण चत्वारः एव व्यवहृयन्ते, बार्हस्पत्यम् पञ्चमो..पि षष्ट्यब्द ज्ञानार्थे प्रयुक्ताः शेषमानत्रयाणि न प्रयुक्ता नित्यशः। उक्तम्-

**चतुर्भिर्व्यवहारो..त्र सौरचान्द्रर्क्षसावनैः।**
**बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः।।सू.सि.।।**

व्यवहारे अहोरात्रमानं सौरेमानतः भवति। (षड्शीतिमुखानि वक्षमाणानि च सौरमानेन ज्ञेयानि। अयन (उत्तरायणं-दक्षिणायणं) ज्ञानं संक्रान्ति पुण्यकालादिकं ज्ञानं सौरमानेन निर्धारितं भवति।

तिथिः-करणं-विवाहः क्षौरादिक्रिया एवं व्रतोपवासा तथा च यात्रादयः चन्द्रमानतः ग्राह्यम्।

नित्यं प्रत्यहं भचक्रभ्रमणं नक्षत्रसमूहस्य प्रवाहवायुकृतपरिभ्रमः नाक्षत्रदिनं भवति। पूर्णिमान्ताधिष्ठितनक्षत्रनामतः मासस्य नामकरणं भवति। यथा-पूर्णिमान्तसमये अश्विनिनक्षत्रं चेत् तदा तन्मासस्यनाम आश्विनः इत्यादयः।

व्यवहारिक जीवने यज्ञयागादि मध्ये दिनगणना सावनमानतः निर्धारितं क्रियते।

सम्वत्सरज्ञानं गुरुमानद्वारा भवति।

(वृहस्पतेर्मध्यमराशि भोगात् सांवत्सरंसिंहितिका वदन्ति) सू.सि.।

## २. ग्रहाः :-

ग्रह् धातोः अच् प्रत्ययः ग्रह शब्दस्य निष्पत्ति भवति। ग्रह शब्दस्य अर्थः अनेको भवन्ति। किन्तु अत्र नवग्रहाणामेव अन्वितिः। यथा-

**सूर्यश्चन्द्रो मंगलश्च बुधश्चापि वृहस्पतिः।**
**शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहानव।। (सं.हि.को.)**

ज्योतिषस्य त्रिस्कन्धेषु इमे ग्रहाः एव स्वीकृताः सन्ति। अत्र प्रथम सूर्यः वर्तते। तेषां सर्वेषां ग्रहाणां तत्वादिसहितानां अत्र विविच्यते-

## सूर्यः

सरति इति सूर्यः। लोकं सुवति प्रेरयति वा इति सूर्यः। वैदिक वाङ्मये अस्यस्वरूपं अनेकरूपेण प्राप्यते। एष वै ग्रहः येनेमाप्रजाः गृहिता, सूर्योदयं कालपुरुषस्य आत्माः विश्वस्य राजा इत्यादयअंशाः प्राप्यन्ते।

**पित्तास्थिसारो..ल्पकचश्च रक्तश्यामाकृतिः स्यान्मधुपिङ्गलाक्षः।**
**कौसुम्भवासाश्चतुरस्रदेहः शूरः प्रचण्डः पृथुबाहुरर्कः।।**फ.दी.२/८।।

**शैवं धाम बहिःप्रकाशकमरुद्देशो रवेः पूर्वदिक्**

**शैवो भिषङ्नृपतिरध्वरकृत्प्रधानी**
**व्याघ्रो मृगो दिनपतेः किल चक्रवाकः।।फ.दी.२/१७।।**

## किमिदं स्वरूपम् :-

अस्यस्वरूपं तेजसः अथ् गोलकवत वर्तते, सम्पूर्ण विश्वस्य कालविभाजकः। ऋतुस्वामी, शास्त्रानुसारेण अस्य वर्णादि ज्ञानम् इदं प्राप्यते-

| | | | |
|---|---|---|---|
| वर्णः | - ताम्रवर्णः | नीचराशिः | - तुलाः |
| धातु | - स्वर्णम् | वाहनम् | - मेषः |
| स्वामीवर्णः | - रक्तः | आत्मादिविभागः | - सत्वम् |
| जातिः | - क्षत्रियः | राजत्वादि विभागः | - राजा |
| तत्वम् | - अग्निः | भाग्योदयवर्षम् | - २२ |
| गुणः | - तामसः | कारकः | - बन्धुबान्धवयोः |
| स्वभावः | - उग्रः | शरीरधातुः | - मज्जा (मांस) |
| वलावलम् | - रात्रौ | धात्वादि अधिपत्यम् | - धातुमूलम् |
| स्थानवलम् | - दशमे | रोगस्थानम् | - उदरः |
| भावकारकः | - १-९-१० | विकारः | - रक्तपित्तयोः |
| विशिष्टदृष्टिः | - ४-८ | विशोन्तरीयदशावर्षम् | - ७ |
| उर्ध्वादिमुखम् | - उर्ध्वमुखम् | अष्टोत्तरीयदशावर्षम् | - ८ |
| देवता | - स्कन्दः | पीड़ाशमनोपायदेवः | - शंकरः, शिवगणः, भैरव |
| विद्या | - शस्त्रम् | | |
| शुभाशुभम् | - पापग्रहः | मूलत्रिकोणम् | - मेषः |
| लिङ्गम् | - पुरुषः | सन्तानोपायः | - रुद्राभिषेक, गणेशमन्त्रजपम् |
| कालवलम् | - मध्याह्ने | | |
| उदयः | - पृष्टोदयः | दानधातुः | - सुवर्णम् |
| प्रकृतिः | - पित्तम् | उपधातुः | - ताम्रम् |
| अर्थप्राप्तीकारकः | - शत्रुः | धान्यम् | - गोधूमः |
| मृत्युः | - शस्त्रेण | विशिष्टदानम् | - केशर-कस्तूरी, भूमिः |
| स्वगृही | - १-८ | दानरसः | - गुणम् |
| उच्चराशिः | - मेषः | दानवस्त्रः | - रक्तम् |

| | | | |
|---|---|---|---|
| फलहोमः | - द्राक्षः | अधिदेवः | - ईश्वरः |
| जपसंख्या | - ७००० | प्रत्यधिदेवः | - अग्निः |
| पीड़ाशमनोपायः | - षड्रसब्राह्मणभोजनम् | मण्डलम् | - वृत्तम् |
| पुष्पम् | - रक्तकर्णिकारः | प्रतिमाधातुः | - ताम्ररक्तचन्दनादि |

## चन्द्रः

चन्द् धातोः णिच् प्रत्यये रकादेशे चन्द्रशब्दस्य निष्पत्तिः भवति। आल्हाददायको चन्द्रः। अस्य अनेकार्थाः सन्ति, यथा- चन्द्रग्रहः शीतलः कुमुदिनीपतिः अस्य अनेकाः पर्यायशब्दाः सन्ति। (१-३-१३ अमरः) वैदिक साहित्ये अस्य विषये अनेकाः मन्त्राः प्राप्यन्ते। वेदोत्तरकाले च सर्वत्रवर्णनमस्य प्राप्यते। पुराणेषु महाकाव्येषु च चन्द्रोपमाया विषये उपाख्यानि सन्ति। वेदाङ्गेषु सर्वत्रास्य विवेचनम् उपलभ्यते। ज्यौतिष दृष्ट्या द्वितीय ग्रहरूपेण स्वीकृयते कर्काधिपतिः मनसोईशः चतुर्थ ग्रहाधीशरूपेणापि स्वीकृयते। ग्रहस्यास्य संज्ञादि ज्ञानलाभाय विवेचनम् अत्र प्रस्तूयते।

**स्थूलो युवा च स्थविरः कृशः सितः कान्तेक्षणश्चासितसूक्ष्ममूर्धजः।**
**रक्तैकसारो मृदुवाक् सितांशुको गौरः शशी वातकफात्मको मृदुः।।फ.दी.२/९।।**
**दुर्गास्थानबधूजलौषधिमधुस्थानं विधोर्वायुदिक्।**
**शास्ताङ्गनारजककर्षकतोयगाः स्युरिन्दोः**
**शशश्च हरिणश्च बकश्चकोरः।।फ.दी.२/१७।।**

## चन्द्रविषयकम् विवरणम्

| | | | |
|---|---|---|---|
| वर्णः | - गौरः | समिधा | - पलाशः |
| तत्त्वम् | - जलम् | विंशोत्तरीयदशावर्षम् | - १० |
| गुणः | - सत्त्वम् | अष्टोत्तरीयदशावर्षम् | - १५ |
| शुभाशुभम् | - शुभः (क्षीण-पाप) | उपग्रहः | - परिघः |
| | | पूर्णदृष्टिः | - सप्तमम् |
| जातिः | - वश्यः | उर्ध्वादिदृष्टिः | - समः |
| रत्नः | - मौक्तिकम् | स्वगृहीराशिः | - कर्कः |
| धातुः | - रजतम् | उच्चराशिः | - वृषभः |

| | | | |
|---|---|---|---|
| नीचराशि: | - वृश्चिक: | विद्याशास्त्रम् | - ज्योतिषम् |
| मूलत्रिकोणम् | - वृषभ: | पुरुषादिसंज्ञा: | - स्त्री |
| देवता | - वरुण: | आत्मादिकालपुरुष: | - मन: |
| कारक: | - माता | राजादि | - राजा-महिषि, सचिवश्च |
| पूर्वादिमुखम् | - पश्चिममुखम् | | |
| अधिपत्य: (रंग) | - श्वेत: | रस: | - लवणम् |
| वयोवर्षम् | - ७० | स्वभाव: | - चंचल: |
| भाग्योदयवर्षम् | - २४ | उदय: | - पृष्ठोदय: |
| शरीरधातु: | - रक्तम् | प्रकृति: | - कफप्रकृति: |
| कालवलम् | - अपराह्ने | पित्तादिविकार: | - कफवातौ |
| वलम् | - रात्रि | रोगस्थानम् | - कण्ठे, वक्षे |
| स्थानवलम् | - चतुर्थम् | पीड़ाशमनोपायदेव: | - कालिकादेव्या सुवासिनी |
| भावकारक: | - ४ | | |
| अर्थप्राप्तिकारक: | - माता | सन्तानोपाय: | - शिवार्चनम् |
| मृत्युकारक: | - जलम् | धार्यऔषधिमूल: | - पलाशमूलम् |
| दानधातु: | - स्वर्णम् | अधिदेवता | - उमा |
| उपधातु: | - रजतम् | प्रत्याधिदेवता | - आप: |
| धान्यम् | - तण्डुला: (अक्षत्) | मण्डलम् | - चतुरस्रम् |
| अन्यदानम् | - कर्पूर:, दधि, शर्करा | प्रतिमाधातु: | - रजतम् |
| ग्रहमुखम् | - पश्चिम: | नैवेद्यम् | - घृत-पायसे |
| अर्थप्राप्तौसहायक: | - माता | फलहोम: | - इक्षु |
| | | वाहनम् | - दशाश्वरथ:, हरिण: |

# भौमः (मंगल)

## अंगरककुजोभौमः लोहिताङ्गोमहीसुतः (अमरः १।३।२५।)

अस्यग्रहस्य अनेकानि नामानि सन्ति। भूमेः अपत्यंइति भौमः। मंगलग्रहवाचिशब्दोयं अमरकोषे पञ्चनामानि सन्ति इति। वैदिकपौराणिक वाङ्मये च अस्याः अनेकानि चरितविषयक उपाख्यानानि प्राप्तानि भवन्ति। रामायण महाभारतयोः अस्य विवेचनम् विस्तारेण प्राप्यते। ज्योतिषशास्त्रेपि तृतीय ग्रहरूपेण भूमिपतिः स्वीकृयते। गुण कर्मादि विषयकविवरणं अत्र प्रस्तूयते इति। मेषवृश्चिकयोः अधीशो अयम्। जातकारिष्ट निवृत्यर्थं च धात्वादिनां दानपरिहारपूर्वकं अत्रवस्तूनां सारणिः प्रस्तूयते इति।

**मध्ये कृशः कुञ्चितदीप्तकेशः क्रूरेक्षणः पैत्तिक उग्रबुद्धिः।**
**रक्ताम्बरो रक्ततनुर्महीजश्चण्डो..त्युदारस्तरुणो..तिमज्ञः।।फ.दी.२/१०।।**
**चोरम्लेच्छकृशानुयुद्धभुवि दिग्याम्या कुजस्योदिता**
**भौमो महानसगतायुधभृत्सुवर्णकाराजकुक्कुटशिवाकपिगृध्रचोराः।फ.दी.२/१८।।**

## भौमविषयकम् विवरणम्

| | | | |
|---|---|---|---|
| वर्णः | - रक्तम् | उच्चराशिः | - मकरः |
| तत्वम् | - अग्निः | नीचराशिः | - कर्कः |
| गुणः | - तामसः | मूलत्रिकोणम् | - मेषः |
| शुभाशुभम् | - पापम् | देवता | - स्कंदः |
| जातिः | - क्षत्रियः | कारकः | - बंधुबान्धवौ |
| रत्नम् | - मूगा (प्रवालम्) | पूर्वादिमुखम् | - दक्षिणमुखम् |
| धातुः | - स्वर्णम् | आधिपत्यम् (रंग पर) | - रक्तम् |
| समिधा | - खादिरम् | वयोवर्षम् | - तरुणवालश्च |
| विंशोत्तरीयदशावर्षम् | - ७ | भाग्योदयवर्षम् | - २८ |
| अष्टोत्तरीयदशावर्षम् | - ८ | शरीरधातुः | - धातुमूलम् |
| पूर्णदृष्टिः | - ४-७-८ | कालवलम् | - मध्याह्ने |
| उर्ध्वादिदृष्टिः | - उर्ध्वा | स्थलवलम् | - दशमे |
| स्वग्रहीराशिः | - मेषवृश्चिकौ | भावकारकः | - ३-६ |

T. HANSA MEHTA LIBRARY

| | | |
|---|---|---|
| अर्थप्राप्तिकारकः | - | शत्रुः |
| मृत्युकारकः | - | शस्त्रम् |
| दानधातुः | - | ताम्रम् |
| दानधान्यम् | - | मसूरः, द्विदलम् |
| अन्यदानम् | - | केसरम्, कस्तूरिका |
| ग्रहमुखम् | - | भूमिः, विद्रुमश्च |
